## इन्धिभवतिभ्यां च। (६/३३९३)

इन्धि भवति इत्येताभ्यां [1]परो [2]लिट् प्रत्ययः किद् भवति। '[3]समीधे दस्यु[4]हन्तमम्' (ऋ.६.१६.१५)। पुत्र ईधे अथर्वणः' (ऋ. ६.१६.१४)। [5]भवतेः खल्वपि—बभूव। बभूविथ। इन्धेः संयोगार्थं [6]ग्रहणम्। भवतेः पिदर्थम्[7] (म. भा. १.१९४)।[8]अत्रेष्टिः—

[१७] [9]श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम्।

[10]श्रेथतुः, श्रेथुः। ग्रेथतुः, ग्रेथुः। देभतुः, देभुः। [11]परिषस्वजे, [12]परिषस्वजाते॥

## मृडमृदगुधकुषक्लिशवदवसः क्त्वा। (७/३३२३)

मृड मृद गुध कुष क्लिश वद वस इत्येतेभ्यः [13]परः [14]क्त्वाप्रत्ययः [15]किद् भवति। 'न क्त्वा सेट्'(१.२.१८/३३२२) इति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः। गुध-[16]कुष-क्लिशीनां तु 'रलो [17]व्युपधाद्धलादेः संश्च' (१.२.२६/२६१७) इति विकल्पे प्राप्ते [18]नित्यार्थं वचनम्। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। [19]क्लिशित्वा। उदित्वा। उषित्वा॥

## रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। (८/२६०९)

रुद विद मुष ग्रहि स्वपि प्रच्छ इत्येतेभ्यः[20] संश्च क्त्वा च [21]कितौ भवतः। रुद-विद-मुषीणां 'रलो व्युपधाद्धलादेः संश्च' (१.२.२६/२६१७) इति विकल्पे प्राप्ते नित्यार्थं [22]ग्रहणम्। ग्रहेर्विध्यर्थमेव। स्वपिप्रच्छयोः सन्नर्थं [23]ग्रहणम्। किदेव हि क्त्वा। रुदित्वा, रुरुदिषति। विदित्वा, विविदिषति। मुषित्वा, मुमुषिषति। गृहीत्वा, जिघृक्षति। सुप्त्वा, सुषुप्सति। पृष्ट्वा, पिपृच्छिषति। ग्रहादीनां कित्वात् सम्प्रसारणं भवति। '[24]किरश्च पञ्चभ्यः' (७.२.७५/२६११) इति प्रच्छेरिडागमः॥

## इको झल्। (९/२६१२)

सन् इत्यनुवर्तते। क्त्वा इति निवृत्तम्। इगन्ताद् धातोः परो झलादिः सन् किद् भवति। चिचीषति। [25]तुष्टूषति। [26]चिकीर्षति। इकः इति किम्? पिपासति। [27]तिष्ठासति। झल् इति किम्? [28]शिशयिषते। [29]किमर्थमिदमुच्यते? गुणो मा भूत् इति। 'अज्झनगमां सनि' (६.४.१६/२६१४) इति दीर्घत्वं[30]गुणस्य बाधकं भविष्यति? यथैव [31]तर्हि दीर्घत्वं गुणं बाधते तथा णिलोपमपि [32]बाधेत। तस्माद् [33]दीर्घत्वस्यावकाश[34]दानाय कित्त्व[35]मिदमारभ्यते। [36]चिचीषति इत्यादिषु [37]सावकाशं दीर्घत्वं परत्वाद् णिलोपेन बाध्यते। [38]ज्ञीप्सति (६.४.५१/२३१३)।

---

1. परतो ग. 2. पित्प्रत्ययः ह. 3. समीये ग. 4. हनम् ब. 5. भवतिः ग.,
श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।
यत्रैकाज्ग्रहणं किंचित् पञ्चैतानि न यङ्लुकि॥ इत्यधिकम् फ. ग, इति ग.
6. वचनम् क.ड.फ. 7. वचनम् इत्यधिकम् अ.क.ड.फ, षिदर्थम् ग. 8. अत्रेष्टिः नास्ति फ. 9. ग्रन्थिर्दम्भिस्वजीनाम् ग. 10. श्रेधतुः। श्रेधुः। ग्रेधतुः ग्रेधुः। देहतुः। देहुः ग. 11. नास्ति अ. 12. परिषस्वजिरे फ. ग. ह. 13. परत्वात् ग. 14. सेट् प्रत्ययः ह. 15. किद्वत् ग. 16. क्लिशानां ग. 17. प्युपधाद् ग. 18. नित्यार्थं नास्ति ह. 19. क्लिशित्वा नास्ति फ. 20. परः इत्यधिकम् फ. ग. ह. 21. कितौ नास्ति ग. 22-23. वचनम् क.ग.ह.ड.फ. 24. तिरश्च ह. 25. तुतूषति फ, नास्ति ह. 26. चिचीर्षति ग.ह, जिहीर्षति क. फ. ह. 27. तितिष्ठासति ह. 28. शिशयिषति क, शिशैषते ह. 29. किमर्थं पुनरिदं ड. फ. ग. 30. गुणबाधकं फ. 31. हि इत्यधिकम् ह, यथैवं क. 32. बाधते ह. 33. द्वित्त्वस्य फ.ग. 34. प्रदानाय फ.ग, प्रदर्शनाय ह. 35. °दमुच्यते ग. 36. चिकीर्षति क. ह, इत्यादौ ड. फ. 37. सावकाशदीर्घत्वापरत्वलोपेन ग. ह. 38. नास्ति ग, ज्ञीप्सतीति फ.